।। দ্বিতীয়োঽধ্যায়ঃ ।।

শ্রৌতস্মৃতিবিরুদ্ধত্বাত স্মৃতয়ো ন গুণান হরেঃ ।
নিষেদ্ধুং শক্নুয়ুর্বেদা নিত্যত্বান্মানমুত্তমম ।। ১ ।।

দেবতাবচনাদাপো বদংতীত্যাদিকং বচঃ ।
নাযুক্তবাদ্যসন্নেব কারণং দৃশ্যতে ক্বচিত ।। ২ ।।

অসজ্জীবপ্রধানাদিশব্দা ব্রহ্মৈব নাপরম ।
বদংতি কারণত্বেন ক্বাপি পূর্ণগুণো হরিঃ ।। ৩ ।।

স্বাতংত্র্যাত সর্বকর্তৃত্বান্নাযুক্তং তদ্বদেচ্ছ্রুতিঃ ।
ভ্রাংতিমূলতয়া সর্বসময়ানামযুক্তিতঃ ।। ৪ ।।

ন তদ্বিরোধাদ্বচনং বৈদিকং শংক্যতাং ব্রজেত ।
আকাশাদিসমস্তং চ তজ্জং তেনৈব লীয়তে ।। ৫ ।।

সোঽনুত্পত্তিলয়ঃ কর্তা জীবস্তদ্বশগঃ সদা ।
সদাভাসো হরিঃ সর্বরূপেষ্বপি সমঃ সদা ।। ৬ ।।

মুখ্যপ্রাণশ্চেংদ্রিয়াণি দেহশ্চৈব তদুদ্ভবঃ ।
মুখ্যপ্রাণবশে সর্বং স বিষ্ণোর্বশগঃ সদা ।। ৭ ।।

সর্বদোষোজ্ঝিতস্তস্মাদ্ভগবান পুরুষোত্তমঃ ।
উক্তা গুণাশ্চাবিরুদ্ধাস্তস্য বেদেন সর্বশঃ ।। ৮ ।।

।। ইতি শ্রীমদানংদতীর্থভগবত্পাদাচার্যবিরচিত ব্রহ্মসূত্রাণুভাষ্যে দ্বিতীয়োঽধ্যায়ঃ ।।

www.yousigma.com